# ७. श्रीकृष्णकर्णामृतम्

## पठन्तु, विचिन्त्य वदन्तु

शिक्षकः - **वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।**
**देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥**
**अतसीपुष्पसंकाशं हारनूपुरशोभितम् ।**
**रत्नकङ्कणकेयूरं कृष्णं वन्दे जगद्गुरुम् ॥**
श्लोकं श्रुतवन्तः खलु ! श्लोके कं स्तुवन्ति ।

छात्रः - श्रीकृष्णं स्तुवन्ति महोदय !

शिक्षकः - श्रीकृष्णं स्तुवन् लीलाशुकः श्रीकृष्णकर्णामृतं रचितवान् । तेन कविना रचितान् कांश्चन श्लोकान् पठामः ।

**प्रश्नाः ?**

1. श्रीकृष्णः कीदृशः ?
2. बालकृष्णस्य कामपि एकां लीलां वदन्तु ।
3. कृष्णभक्तिपूर्वकं श्लोकमेकं वदन्तु ।

© SCERT not to be republished

**उद्देश्यम्**

* श्रीकृष्णबाल्यलीलाविनोदानुभूतिसम्पादनम् ।
* छात्रेभ्यः मानसिकोल्लासस्य उत्पादनम् ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगाहनम् अभिवर्धयन्तु ।



1. बालाय नीलवपुषे नवकिङ्किणीकजालाभिरामजघनाय दिगम्बराय ।
शार्दूलदिव्यनखभूषणभूषिताय नन्दात्मजाय नवनीतमुषे नमस्ते ॥



2. करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥

© SCERT not to be republished



3. कस्तूरीतिलकं ललाटफलके वक्षस्स्थले कौस्तुभं
नासाग्रे नवमौक्तिकं करतले वेणुं करे कङ्कणम् ।
सर्वाङ्गे हरिचन्दनं च कलयन् कण्ठे च मुक्तावलीं
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ॥



4. अङ्गुल्या कः कवाटं प्रहरति ? कुटिले ! माधवः किं वसन्तो ?
नो चक्री किं कुलालो ? न हि धरणीधरः किं द्विजिह्वः फणीन्द्रः ?
नाहं घोराहिमर्दी किमसि खगपतिर्नो हरिः किं कपीन्द्रः ?
इत्येवं गोपकन्याप्रतिवचनजितः पातु वश्चक्रपाणिः ? ॥



5. कस्त्वं बाल बलानुजः किमिह ते मन्मन्दिराशङ्कया
युक्तं तन्नवनीतपात्रविवरे हस्तं किमर्थं न्यसेः ।
मातः कञ्चन वत्सकं मृगयितुं मागा विषाणं क्षणा -
दित्येवं वरवल्लवीप्रतिवचः कृष्णस्य पुष्णातु नः ॥



6. कालिन्दीपुलिने तमालनिबिडच्छाये पुरस्संचर-
त्तोये तोयजपत्रपात्रनिहितं दध्यन्नमश्नाति यः ।
वामे पाणितले निधाय मधुरं वेणुं विषाणं कटि -
प्रान्ते गाश्च विलोकयन् प्रतिकलं तं बालमालोकये ॥



7. रामो नाम बभूव हुं तदबला सीतेति हुं तां पितु
र्वाचा पञ्चवटीतटे विहरतस्तस्याहरद्रावणः ।
निद्रार्थं जननी कथामिति हरे हुङ्कारतः शृण्वतः
सौमित्रे क्व धनुर्धनुर्धनुरिति व्यग्रा गिरः पान्तु नः ॥



8. शम्भो ! स्वागतमास्यतामित इतो वामेन पद्मासन
क्रौञ्चारे कुशलं सुखं सुरपते ! वित्तेश नो दृश्यसे ।
इत्थं स्वप्नगतस्य कैटभजितः श्रुत्वा यशोदागिरः
किं किं बालक जल्पसीति रचितं थूथू कृतं पातु वः ॥

© SCERT to be republished

## सारांशः

1. कविः बालं श्रीकृष्णम् एवं स्तौति । श्रीकृष्णः बालः । तस्य शरीरस्य वर्णः मेघश्यामलः, तस्य कट्यां नूतनकिङ्किणीनां बन्धः अस्ति । तेन तस्य जघनं रम्यम् अस्ति सः बालः वस्त्राणि न धरति, सः दिगम्बरः । कण्ठे व्याघ्रनखेन युक्तं भूषणम् अस्ति । मुग्धमनोहरः सः लीलार्थं नवनीतम् अपहरति । तस्मै नन्दकुमाराय नमस्काराः ।

2. श्रीकृष्णस्य हस्तौ, पादौ मुखं च इतीमे पद्मसदृशा एव । अत्र स्वहस्तपद्मेन चरणपद्मं मुखपद्मे स्थापयन्तं कृष्णं, वटपत्रे सुखं शयानं बालं श्रीकृष्णं मनसा ध्यायामि ।

3. बालकृष्णस्य दिव्यमनोहररूपम् एवं वर्णयति । श्रीकृष्णस्य विशाले ललाटभागे कस्तूरीतिलकं विभाति । वक्षोभागे कौस्तुभमणिः विराजते । नासिकायाः अग्रे मुक्तामणिः दृश्यते । हस्ते वेणुः करे कङ्कणमपि राजते । शरीरे चन्दनं भासते । कण्ठे मुक्ताहारः भाति । इत्थं गोपिकापरिवृतः दिव्यमनोहरमूर्तिः गोपालकृष्णः विजयते ।

4. एकदा श्रीकृष्णः राधायाः गृहमागत्य कवाटं प्रहरति स्म । तदानीं राधाकृष्णयोः मध्ये चमत्कारात्मकं सम्भाषणमभूत् ।

तदित्थमस्ति ।

| | | | | | |
|---|---|---|---|---|---|
| राधा | - | कः स्वाङ्गुल्या कवाटं प्रहरति ? | माधवः | - | अहं माधवः। |
| राधा | - | वसन्तः किम् ? | माधवः | - | न अहं चक्री । |
| राधा | - | कुलालः किम् ? | माधवः | - | धरणीधरः। |
| राधा | - | द्विजिह्वः फणीन्द्रः आदिशेषः किम् ? | माधवः | - | अहं घोराहिमर्दी । |
| राधा | - | खगपतिः किम् ? | माधवः | - | न, हरिः। |
| राधा | - | किं वानरः? | | | |

ईदृशसम्भाषणपटुः श्रीकृष्णः अस्मान् रक्षतु इति ।

5. एका स्त्री स्वगृहमागतं कृष्णम् एवं पृच्छति । त्वं कः ? अहं बलानुजः इति कृष्णः वदति । तर्हि अत्र किं कार्यं मम गृहं किमर्थमागतवान् ? नवनीतपात्रं हस्ते किमर्थं स्थापितवान् ? इति सा स्त्री पृच्छति । तदा बालः श्रीकृष्णः गोवत्सकं मृगयन् सः अत्रास्ति वा इति द्रष्टुम् आगतोऽस्मि इति यः समाधानं ददाति तादृशः कृष्णः रक्षतु इति ।

6. बालकृष्णः तमालवृक्षवनान्तर्गतासु यमुनातीरसैकतवेदिकासु गवां संरक्षणं कुर्वन् पद्मपत्रपात्रस्थितं दध्यन्नं हस्तेन स्वीकृत्य, मधुरं स्ववेणुं वामहस्ते संस्थाप्य, विषाणं कटितले स्थापयन् विराजते । तं कृष्णं पश्य इति ।

© SCERT not to be republished

7. यशोदा श्रीकृष्णं प्रति श्रीरामस्य कथां कथयति स्म । यशोदा - पुरा रामो नाम आसीत् । श्रीकृष्णः - हुम् ('हुङ्कारध्वनिं' कुर्वन् शृणोति) तस्य पत्नी सीता । श्रीकृष्णः - हुम् । सः पितुः वचनं पालयन् भार्यया सह वनवासं कुर्वन् पञ्चवटीतटे विहरति स्म । श्रीकृष्णः - हुम् । तदानीं रावणो नाम राक्षसः तां सीताम् अपहृतवान् एवं कथां शृण्वन् कृष्णः ''हे लक्ष्मण ! धनुः कुत्रास्ति'' इति हठात् अवदत् । एतादृशः श्रीकृष्णः अस्मान् रक्षतु !

8. श्रीकृष्णः निन्द्रायां स्थितः सन् एवं भाषणं कृतवान् ''हे ईश्वर तव स्वागतम् । हे ब्रह्मन् ! अत्र वामभागे उपविश । हे कुमार ! कुशलं किम् ? हे देवेन्द्र ! कुशलं वा ? हे कुबेर ! बहोः कालात् त्वं न दृश्यसे। एवं श्रीकृष्णस्य असन्दर्भं बालालापं श्रुत्वा यशोदया हे कृष्ण ! किं वदसि ? इति पृष्टः । तादृशः कृष्णः अस्मान् रक्षतु इति ।

**कविपरिचयः**

'श्रीकृष्णकर्णामृतमिति' ग्रन्थस्य प्रणेता बिल्वमङ्गलः । अस्य अपरं नाम लीलाशुकः इति । क्री.श. एकादशशताब्दीयः। स्वाकीये श्रीकृष्णकर्णामृते दशाधिकत्रिशतं श्रीकृष्णवर्णनसम्बद्धाः श्लोकाः उपनिबद्धाः। एतान् भक्तिपारवश्यान् श्लोकान् केचन पारायणरूपेण प्रतिदिनं पठन्ति । केचन अभिनयन्ति च । अस्य बिल्वमङ्गलस्य कवित्वं मधुरातिमधुरं सरसञ्च वर्तते ।

## एतानि कुर्वन्तु

### I. भावावगाहनम् - प्रतिस्पन्दनम्

**अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. ''अङ्गुल्या कः'' इति श्लोकानुसारं (द्वौ छात्रौ) एकः राधेव प्रश्नान् पृच्छतु । अन्यः कृष्णवत् समाधानं वदतु ।

२. ''कस्तूरीतिलकम्'' इति श्लोकम् अभिनयरूपेण प्रदर्शयन्तु ।

३. बालकृष्णः अनेकाः लीलाः प्रदर्शितवान् खलु ! एताः साध्याः किमिति चर्चां कुर्वन्तु ।

**आ. अत्र श्लोकेषु विद्यमानानि सप्तमीविभक्तिपदानि चित्वा तेषामधः रेखाङ्कनं कुर्वन्तु । श्लोकेषु विद्यमानानि प्रश्नार्थकवाक्यानि चित्वा लिखन्तु ।**

© SCERT not to be republished

### इ. अधः दत्तानां वाक्यानां समानार्थकवाक्यानि श्लोकेषु अन्विष्य लिखन्तु ।

१. श्रीकृष्णः बालः । तस्य शरीरस्य वर्णः नीलः ।

२. श्रीकृष्णस्य हस्तौ पादौ, मुखं च इति इमे पद्मसदृशाः ।

३. श्रीकृष्णस्य विशाले ललाटभागे कस्तूरीतिलकं विभाति ।

४. कः स्वाङ्गुल्या कवाटं प्रहरति ।

### ई. अधः दत्तं श्लोकं पठन्तु । कोष्ठके दत्तानां प्रश्नवाचकानाम् आधारेण प्रश्ननिर्माणं कुर्वन्तु ।

( कीदृशः   कः   कदा )

**काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।**

**वसन्तकाके संप्राप्ते काकः काकः पिकः पिकः ॥**

### उ. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. कीदृशं मुकुन्दं कविः स्मरति ?

२. कस्तूरीतिलकम् इति श्लोकमाधारीकृत्य श्रीकृष्णस्य स्वरूपं वर्णयन्तु ?

३. 'कस्त्वं बाल' इति श्लोकमाधारीकृत्य प्रश्नोत्तराणि लिखन्तु ।

४. राधाकृष्णयोः संवादं लिखन्तु ।

५. श्रीकृष्णः स्वप्ने किमुक्तवान् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. अत्र श्लोके कर-पद-मुखानि अरविन्देन तुल्यानि इति वर्णितानि तथा कृतं साम्यं किं युक्तम् ? लिखन्तु ।

२. श्रीकृष्णः गोपालचूडामणिः इति कविः उक्तवान् । किमर्थं तथा उक्तवान् इति स्वीयवाक्यैः लिखन्तु ।

३. यशोदा कृष्णं प्रति श्रीरामस्य कथाम् उक्तवती । किमुक्तवती इति स्वीयवाक्यैः लिखन्तु ।



© SCERT not to be republished

४. श्रीकृष्णवर्णनं दृष्ट्वा श्रीरामं वर्णयन्तु ।

५. श्रीकृष्णः किमर्थं धनुर्धनुरिति अवदत् ?

**आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. श्रीकृष्णस्य लीलाविशेषं स्वीयवाक्यैः लिखन्तु ।

२. पाठगतश्लोकानां भावं सङ्क्षेपेण स्वीयवाक्यैः लिखन्तु ।

**इ. सर्जनात्मकतया समाधानानि लिखन्तु ।**

१. रामकृष्णयोः गुणान् पट्टिकारूपेण लिखन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

శ్రీకృష్ణుడు దేవకీవసుదేవుల పుత్రుడు. యశోదానందుల ఇంట గోకులంలో పెరిగాడు. యశోద కృష్ణుని ఎంతో ప్రేమతో పెంచింది. శ్రీకృష్ణుడు గోపబాలకులతో కలిసి విపరీతమైన అల్లరి చేసేవాడు. అందరి ఇళ్ళలో వెన్నను దొంగలించి అందరికీ పంచి పెట్టేవాడు. ఆ బాలకృష్ణుని చంపడానికై కంసుడు అనేక మంది రాక్షసులను పంపాడు. శ్రీకృష్ణుడు వారందరినీ చంపాడు.

**ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।**

बालकृष्णस्य बुद्धिकौशलम् उद्दिश्य सहच्छात्रेभ्यः सूचयतु ।

## III. भाषांशाः

### 1. पदजलाभिवृद्धिः

**अ. कोष्ठकस्थेन उचितेन अव्ययपदेन रिक्तस्थानानि पूरयन्तु ।**

| अपि | कुत्र | एव | अधुना |
|---|---|---|---|

माता - पुत्रि ! साम्प्रतं त्वम् ............. गच्छसि ?

पुत्री - .................... अहम् खेलनाय गच्छामि ।

माता - किं तव सखी सुनीता ............. क्रीडितुं गच्छति ?

पुत्री - आम् । अहं सुनीतया सह ............... गच्छमि ।

© SCERT not to be republished

### आ. मञ्जूषायां दत्तानां पदानां साहाय्येन अनुच्छेदं पूरयन्तु ।

| | | | |
|---|---|---|---|
| अध्यापकाः | उद्यानपालकः | विज्ञानप्रयोगशाला | योग्याः |
| भवनम् | पुस्तकालयः | भाग्यनगरे | सुन्दराणि |

**मम विद्यालयः**

मम विद्यालयः ............. अस्ति । विद्यालयस्य ............ विशालम् । अत्र द्वादशश्रेण्यः सन्ति । ............. छात्रान् स्नेहेन पाठयन्ति । छात्राः अपि ................ सन्ति । विद्यालये विशालः ................ विस्तृतं क्रीडाक्षेत्रम्, नृत्यसङ्गीतशाला .................. चापि सन्ति । विद्यालयस्य पुरतः रम्यम् उद्यानम् अस्ति । अत्र .......... पुष्पाणि विकसन्ति । ............ अत्र परिश्रमेण कार्यं करोति ।

## 2. साहित्यांशाः

### अ. अधः दत्तस्य श्लोकपादस्य गुरुलघुनिरूपणं गणविभजनञ्च कथं कृतमिति अवगच्छन्तु ।

| | | | | | | |
|---|---|---|---|---|---|---|
| U U U | I I U | I U I | I I U | U U I | U U I | U |
| आ त्मा त्वं | गि रि जा | म तिः स | ह च राः | प्रा णाः श | री रं गृ | हम् |
| **म** | **स** | **ज** | **स** | **त** | **त** | **ग** |

**अत्र क्रमशः म - स - ज - स - त - त - ग इतीमे गणाः वर्तन्ते ।**

**एवं वर्तन्ते चेत् "शार्दूलविक्रीडितमिति" छन्दः भवति ।**

**शार्दूलविक्रीडितवृत्तस्य लक्षणम् ।**

१. श्लोके पादचतुष्टयं भवति ।

२. प्रतिपादं क्रमेण 'म-स-ज-स-त-त-ग' इतीमे गणाः भवन्ति ।

३. द्वादशस्थाने - सप्तमस्थाने यतिर्भवति ।

४. प्रतिपादं एकोनविंशतिः अक्षराणि भवन्ति ।

**सूर्याश्वैर्मसजस्ततास्सगुरवश्शार्दूलविक्रीडितम् ।**

© SCERT not to be republished

आ. अधः दत्तानां श्लोकपादानां लघुगुरूनिरूपणपुरस्सरं गणविभजनं सोदाहरणं निरूपयन्तु ।

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृताधार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥

इ. पठन्तु - अवगच्छन्तु ।

सुदती नूतनमदनः मदनागोतुङ्गपूर्णमणिमयसदनः ।
सदनामयगजरदनः रदनागेन्द्रनिभकीर्तिरसनरसिंहः ॥

अत्र प्रथमपादे मुक्तं मदन इति पदम् । प्रथमपादे स्थितं मदन इति पदं पुनः द्वितीयपादे प्रथमतया आगतम् । तथैव सदन रदन इति पदद्वयञ्च ।

विवरणम् - मुक्तं पदं गृहीत्वा पुनः तत्पदमेव गृहीत्वा कृता रचना 'मुक्तपदग्रस्ता' भवति ।

ई. अधः दत्तस्य अनुच्छेदस्य दत्तान् प्रश्नान् आधारीकृत्य अलङ्कारनिरूपणं कुर्वन्तु ।

"आतिथ्यागमनं ज्ञातम्, ज्ञात्वा ते अन्तः नीताः। नीत्वा उपचाराः कृताः।"

१. अस्मिन् कः विषयः दृश्यते ?

२. वाक्यान्ते आगतं पदं किम् ?

३. वाक्यादौ आगतं पदं किम् ?

४. कोऽयमलङ्कारः ?

५. मुक्तपदग्रस्तालङ्कारे कः अंशः विद्यते ?

उ. अधः दत्तस्य श्लोकस्य अलङ्कारनिरूपणं कुर्वन्तु ।

गेहे गेहे जङ्गमाहेमवल्ली वल्ल्यां वल्ल्यां पार्वणश्चन्द्रबिम्बः ।
बिम्बे बिम्बे कोकिलानां विरावः रावे रावे जायते पञ्चबाणः ॥

### परियोजनाकार्यम्

भक्तिपूर्वकचमत्कारश्लोकान् सङ्गृह्य लिखन्तु । कक्ष्यायां प्रदर्शयन्तु ।

©SCERT not to be republished